वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (१५)

१४.०२.२०११

- इकारान्तः पुँल्लिङ्गः 'हरि' शब्दः ।
- हरि (सुँ) स् ('स्वौजसमौट्...' – ४.१.२ – इति प्रथमैकवचने सुप्रत्ययः)
- हरि (रुँ) र् ('ससजुषो रुः' – ८.२.६६)
- हरिः ('खरवसानयोर्विसर्जनीयः' – ८.३.१५)

- हरि औ ('स्वौजसमौट्...' – ४.१.२ – इति प्रथमाद्विवचने औप्रत्ययः)
- हरी ('प्रथमयोः पूर्वसवर्णः' – ६.१.१०२)

- हरि (जस्) अस्
  - पूर्वसवर्णदीर्घे प्राप्ते,

२४१. जसि च (७.३.१०९)

- पदद्वयम् ।
- ‘अङ्गस्य’ (६.४.१) इत्यधिक्रियते । ‘ह्रस्वस्य गुणः’ (७.३.१०८) इत्यनुवर्तते ।
- ह्रस्वान्तस्य अङ्गस्य गुणः स्यात् जसि परे ।

- हरि अस्
  - 'अलोऽन्त्यस्य' (१.१.५२) इति अन्त्यस्य इकारस्य गुणः ।
  - 'स्थानेऽन्तरतमः' (१.१.५१) इति प्रमाणतः आन्तर्यॆण अकारे, स्थानतः आन्तर्यॆण एकारे च प्राप्ते,
  - 'यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयः' (प) । इति इकारस्य गुणः एकारः ।
- हरे अस् ('जसि च' – ७.३.१०९ – इति गुणः)
- हरयस् ('एचोऽयवायावः' – ६.१.७८ – इति अयादेशः)
- हरयः (रुत्वविसर्गौ)

- हे हरि (सुँ) स्
  - 'एङ्ह्रस्वात् सम्बुद्धेः' – ६.१.६९ – इति सम्बुद्धिलोपे प्राप्ते,

२४२. ह्रस्वस्य गुणः (७.३.१०८)

- पदद्वयम् ।
- ‘अङ्गस्य’ (६.४.१) इत्यधिक्रियते । ‘सम्बुद्धौ च’ (७.३.१०६) इत्यतः ‘सम्बुद्धौ’ इति अनुवर्तते ।
- ह्रस्वस्य गुणः स्यात् सम्बुद्धौ ।
- हे हरि स्
- हे हरे स् (‘ह्रस्वस्य गुणः’ – ७.३.१०८)
- हे हरे (‘एङ्ह्रस्वात् सम्बुद्धेः’ – ६.१.६९)

- हे हरी
- हे हरयः

- हरि अम्
- हरिम् (‘अमि पूर्वः’ – ६.१.१०७ – इति पूर्वरूपम्)

- हरी

- हरि (शस्) अस्
- हरीस् (‘प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२ – इति पूर्वसवर्णदीर्घः)
- हरीन् (‘तस्माच्छसो नः पुंसि’ – ६.१.१०३ – इति सकारस्य नत्वम्)

२४३. शेषो घ्यसखि (१.४.७)

- पदत्रयम् । शेषः, घि, असखि ।
- 'यू स्त्र्याख्यौ नदी' (१.४.३) इत्यतः 'यू' इति, 'ङिति ह्रस्वश्च' (१.४.६) इत्यतः 'ह्रस्वः' इति च अनुवर्तते ।
- इश्च उश्च यू (इ+उ = यु, तस्य प्रथमाद्विवचने यू) । इवर्ण-उवर्णौ इत्यर्थः । ह्रस्व इति प्रत्येकम् अन्वेति ।
- उक्तादन्यः शेषः । 'यू स्त्र्याख्यौ नदी' (१.४.३), 'नेयङुवङ्स्थानावस्त्री' (१.४.४), 'वाऽमि' (१.४.५), 'ङिति ह्रस्वश्च' (१.४.६) इत्येतैः पूर्वसूत्रैः नदीसंज्ञा उक्ता । तद्भिन्नौ = अनदीसंज्ञौ अत्र शेषपदेन विवक्ष्यन्ते ।
- अनदीसंज्ञौ ह्रस्वौ यौ इवर्ण-उवर्णौ, तदन्तं सखिवर्जं घिसंज्ञं स्यात् ।
- उदा: हरि ।

- ‘शेषः’ किम्?
- मत्यै ।
- मतिशब्दस्य ङित्सु प्रत्ययेषु परेषु ‘ङिति ह्रस्वश्च’ इति विकल्पेन नदीसंज्ञा उक्ता । तत्पक्षे घिसंज्ञा न भवति ।
- एकसंज्ञाधिकारात् सिद्धे शेषग्रहणं स्पष्टार्थम् ।

- ‘ह्रस्वौ’ किम्?
- वातप्रम्ये ।
- वातप्रमीशब्दस्य स्त्रीत्वाभावात् नदीसंज्ञा नास्ति । ह्रस्वग्रहणाभावे अत्रापि घिसंज्ञा स्यात् । (तत्प्रयुक्तो गुणश्च स्यात्) ।

- ‘यू’ किम्?
- मात्रे ।
- मातृशब्दस्य ह्रस्वान्तत्वेऽपि, नदीसंज्ञाभावेऽपि घिसंज्ञा न भवति ।

- हरि (टा) आ (‘शेषो घ्यसखि’ इति घिसंज्ञा)

२४४. आङो नाऽस्त्रियाम् (७.३.१२०)

- पदत्रयम् । आङः, ना, अस्त्रियाम् ।
- ‘अच्च घेः’ (७.३.११९) इत्यतः ‘घेः’ इत्यनुवर्तते ।
- घेः परस्य आङः ना स्याद् अस्त्रियाम् ।
- आङिति टासंज्ञा प्राचाम् ।
- हरि आ
- हरि ना (‘आङो नाऽस्त्रियाम्’ – ७.३.१२० – इति नादेशः)
- हरिणा (‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ – ८.४.२ – इति णत्वम्)

- ‘अस्त्रियाम्’ किम्?
- मत्या
- घिसंज्ञायां सत्यामपि नाभावो न भवति ।

- हरि (ङे) ए (‘शेषो घ्यसखि’ – १.४.७ – इति घिसंज्ञा)
  - यणि प्राप्ते,

२४५. घेर्ङिति (७.३.१११)

- पदद्वयम् । घेः, ङिति ।
- 'सुपि च' (७.३.१०२) इत्यतः 'सुपि' इति, 'ह्रस्वस्य गुणः' (७.३.१०८) इत्यतः 'गुणः' इति च अनुवर्तते ।
- घिसंज्ञकस्य ङिति सुपि गुणः स्यात् ।
- हरि ए
- हरे ए ('घेर्ङिति' – ७.३.१११ – इति गुणः)
- हरये ('एचोऽयवायावः' – ६.१.७८ – इति अयादेशः)
- 'घेः' किम्?
- सख्ये ।
- 'असखि' इत्युक्तत्वात् सखिशब्दस्य घिसंज्ञा नास्ति ।

- ‘ङिति’ किम्?
- हरिभ्याम् ।
- ‘भ्याम्’ इति ङित् प्रत्ययो न ।

- ‘सुपि’ किम्?
- पट्वी ।
- पटु + (ङीप्) ई ।
- ङित्वम् अस्ति, किन्तु नायं सुप्-प्रत्ययः ।